## इरयो रे। (७६/३८४७)

इरे इत्येतस्य छन्दसि विषये [1]बहुलं रे इत्ययमादेशो भवति। 'गर्भं प्रथमं दध्र आपः'। (ऋ. १०.८२.५)। [2]याऽस्य परिदध्रे। धाञो रेभावस्य असिद्धत्वाद् आतो लोपो भवति। न च भवति। [3]परमाया धियोऽग्निकर्माणि चक्रिरे। अत्र रेशब्दस्य सेटां धातूनामिटि कृते पुना रेभावः क्रियते, तदर्थम् इरयोः इत्ययं [4]द्विवचननिर्देशः॥

## अचि श्नुधातुभ्रुवां य्वोरियङुवङौ। (७७/२७१)

श्नुप्रत्ययान्तस्याङ्गस्य धातोः इवर्णोवर्णान्तस्य भ्रु इत्येतस्य इयङ उवङ इत्येतावादेशौ भवतोऽ[5]जादौ प्रत्यये परतः। आप्नुवन्ति। [6]राध्नुवन्ति। शक्नुवन्ति। धातोः – चिक्षियतुः। चिक्षियुः। लुलुवतुः। लुलुवुः। नियौ। नियः। लुवौ। लुवः। [7]भ्रुवौ। भ्रुवः। अचि इति किम्? आप्नुयात्। शक्नुयात्। साध्नुयात्। श्नुधातुभ्रुवाम् इति किम्? लक्ष्म्यै। वध्वै। य्वोः इति किम्? चक्रतुः। चक्रुः। इयङुवङ्भ्यां गुणवृद्धी भवतो विप्रतिषेधेन। चयनम्। चायकः। लवनम्। लावकः।

[७८५] इयङुवङ्प्रकरणे तन्वादीनां छन्दसि बहुलमु[8]पसङ्ख्यानं कर्तव्यम्। (म. भा. ३.२०९)

तन्वं (अ.वे. ५.३.१) पुषेम। तनुवं (तै. १.५.५.४) पुषेम। विष्वं पुषेम। विषुवं पुषेम। स्वर्गो लोकः। सुवर्गो (तै. १.५.७.१) लोकः। त्र्यम्बकं (तै. १.८.६) यजामहे। त्रियम्बकं यजामहे॥

## अभ्यासस्यासवर्णे। (७८/२२९०)

अभ्यासस्य इवर्णोवर्णान्तस्य अबसर्णेऽचि परतः इयङ उवङ [9]इत्येतावादेशौ भवतः। इयेष। उवोष। इयर्ति। असवर्णे इति किम्? ईषतुः। ईषुः। ऊषतुः। ऊषुः। अचि इत्येव, इयाज। उवाप॥

## स्त्रियाः। (७९/३०१)

स्त्री इत्येतस्याजादौ प्रत्यये परतः इयङ आदेशो भवति। [10]स्त्री, स्त्रियौ, स्त्रियः। स्त्रीणाम् इत्यत्र परत्वान्नुडागमः। पृथग्योगकरणमुत्तरार्थम्॥

## वाऽम्शसोः। (८०/३०२)

अमि शसि[11] परतः [12]स्त्रियां वा इयङ आदेशो भवति। स्त्रीं पश्य, स्त्रियं पश्य। स्त्रीः पश्य, स्त्रियः पश्य॥

---

1. बहुलम् नास्ति ह. 2. यस्य ड, योऽस्य क. 3. परिमाया वियोगी कर्माणि विचिक्रिरे ह. 4. वचननिर्देशः क. 5. यथासङ्ख्यम् इत्यधिकम् फ. ह. 6. नास्ति ह. 7. नास्ति फ. 8. वक्तव्यम् ह. 9. इत्येतौ नास्ति फ. 10. स्त्री नास्ति ड. क. ह. 11. च इत्यधिकम् ड. फ. ह. 12. स्त्रीशब्दस्य फ. ह.